DO NOT OPEN THIS TEST BOOKLET UNTIL YOU ARE ASKED TO DO SO

**T.B.C. : 19/15/ET** **Booklet Sr. No.................................**

0002

# TEST BOOKLET

# SANSKRIT

# PAPER III

Time Allowed : $2\frac{1}{2}$ Hours] [Maximum Marks : 150

*All* questions carry equal marks.

## INSTRUCTIONS

1. Write your Roll Number only in the box provided alongside. Do not write anything else on the Test Booklet.
2. This Test Booklet contains **75** items (questions). Each item comprises four responses (answers). Choose only one response for each item which you consider the best.
3. After the candidate has read each item in the Test Booklet and decided which of the given responses is correct or the best, he has to mark the circle containing the letter of the selected response by blackening it completely with ball point pen as shown below. *H.B. Pencil should not be used* in blackening the circle to indicate responses on the answer sheet. In the following example, response "C" is so marked :

   (A) (B) ● (D)

4. Do the encoding carefully as given in the illustrations. While encoding your particulars or marking the answers on answer sheet, you should blacken the circle corresponding to the choice in full and no part of the circle should be left unfilled. You may clearly note that since the answer sheets are to be scored/evaluated on machine, any violation of the instructions may result in reduction of your marks for which you would yourself be responsible.
5. You have to mark all your responses ONLY on the ANSWER SHEET separately given. *Responses marked on the Test Booklet or in any paper other than the answer sheet shall not be examined.* Use ball point pen for marking responses.
6. All items carry equal marks. Attempt all the items.
7. Before you proceed to mark responses in the Answer Sheet fill in the particulars in the front portion of the Answer Sheet as per the instructions.
8. After you have completed the test, hand over the OMR answer-sheet to the Invigilator.

DO NOT OPEN THIS TEST BOOKLET UNTIL YOU ARE ASKED TO DO SO

संस्कृत

## प्रश्न-पत्र III

समय : $2\frac{1}{2}$ घण्टे] [पूर्णाङ्काः : 150

**विशेष :** इस प्रश्न-पत्र में बहुविकल्पीय **पचहत्तर (75)** प्रश्न हैं । प्रत्येक प्रश्न **दो (2)** अंकों का है । **सभी** प्रश्न अनिवार्य हैं ।

1. 'द्यावा चिदस्मै पृथिवी नमेते शुष्माच्चिदस्य पर्वता भयन्ते' इत्युद्धरणमस्ति –

    (A) पुरुषसूक्ते (B) हिरण्यगर्भसूक्ते

    (C) इन्द्रसूक्ते (D) वाक्सूक्ते

2. 'अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम्' इत्युद्धरणमस्ति –

    (A) वाक्सूक्ते (B) पृथिवीसूक्ते

    (C) हिरण्यगर्भसूक्ते (D) पुरुषसूक्ते

3. 'वाङ्मनस्' आख्यानस्य उल्लेखोऽस्ति –

    (A) पृथिवीसूक्ते (B) शतपथब्राह्मणग्रन्थे

    (C) ऐतरेयब्राह्मणग्रन्थे (D) पञ्चमहायज्ञे

4. वेदाः सर्वासां सत्यविद्यानां पुस्तकमस्ति—इति मतमस्ति –

(A) उव्वटस्य (B) श्रीपाददामोदरसातवलेकरस्य

(C) महीधरस्य (D) महर्षि दयानन्दस्य

5. प्राचीनवेदव्याख्याकारो नास्ति –

(A) आर्यभट्टः (B) उव्वटः

(C) सायणः (D) महीधरः

6. ऋग्वेदे कस्य स्वरस्य चिह्नं न दृश्यते ?

(A) अनुदात्तस्य (B) उदात्तस्य

(C) प्रचयस्वरितस्य (D) अनुदात्ततरस्य

7. 'तत्र को मोहः कः शोक एकत्वमनुपश्यतः' इत्युद्धरणम् अस्ति –

(A) ईशोपनिषदि (B) केनोपनिषदि

(C) कठोपनिषदि (D) तैत्तिरीयोपनिषदि

8. 'विद्यया विन्दतेऽमृतम्'' इत्युद्धरणमस्ति –

(A) कठोपनिषदि (B) तैत्तिरीयोपनिषदि

(C) केनोपनिषदि (D) बृहदारण्यकोपनिषदि

9. ''वर्णः स्वरः । मात्रा बलम् । साम संतानः । इत्युक्तः शिक्षाध्यायः ।'' इत्युद्धरणमस्ति –

(A) बृहदारण्यकोपनिषदि (B) कठोपनिषदि

(C) केनोपनिषदि (D) तैत्तिरीयोपनिषदि

10. याज्ञवल्क्यजनकयोः संवादो वर्तते –

(A) बृहदारण्यकोपनिषदि (B) तैत्तिरीयोपनिषदि

(C) केनोपनिषदि (D) कठोपनिषदि

11. ''यन्नु म इयं भगो सर्वापृथिवी वित्तेन पूर्णा स्यात् स्यां न्वहं तेनामृता'' इति कथनमस्ति –

(A) मैत्रेय्या (B) नचिकेतसः

(C) जनकस्य (D) वाजश्रवसः

12. बृहदारण्यकोपनिषदनुसारेण याज्ञवल्क्यस्य के द्वे भार्ये बभूवतुः ?

(A) गार्गी-मैत्रेयी च
(B) गार्गी-कात्यायनी च
(C) वाचक्नवी-गार्गी च
(D) मैत्रेयी-कात्यायनी च

13. वेदाङ्गेषु मुखत्वं कस्य ?

(A) शिक्षायाः
(B) व्याकरणस्य
(C) कल्पस्य
(D) निरुक्तस्य

14. भावप्रधानं भवति निरुक्तानुसारेण –

(A) सत्त्वम्
(B) आख्यातम्
(C) असत्त्वम्
(D) अनाख्यातम्

15. निरुक्तानुसारेण 'परि' उपसर्गस्य अर्थोऽस्ति –

(A) उभयतः
(B) उपरितः
(C) सर्वतः
(D) पूजितः

16. अधोऽङ्कितेषु निपातो नास्ति –

(A) प्र
(B) इव
(C) न
(D) चित्

17. निरुक्ताध्ययनस्य प्रयोजनमस्ति –

(A) वेदमन्त्राणां व्यञ्जनज्ञानम् (B) वेदमन्त्राणां स्वरज्ञानम्

(C) व्यञ्जनविभागः (D) वेदमन्त्राणामर्थज्ञानम्

18. "जातानि वेद जातानि वैनं विदुर्जाते जाते विद्यत इति वा" इति निर्वचनमस्ति –

(A) जातवेदस् इत्यस्य (B) वैश्वानरः इत्यस्य

(C) नदी इत्यस्य (D) अश्वः इत्यस्य

19. व्याकरणाध्ययनस्य पतञ्जलेः मतानुसारं किं प्रमुखं प्रयोजनम् ?

(A) भाषाशिक्षणम् (B) शब्दानां साधुताज्ञानम्

(C) वेदानां रक्षणम् (D) लोकप्रतिष्ठा

20. कः शब्दः मिथ्याप्रयुक्तः कथ्यते ?

(A) अनर्थकः शब्दः (B) अज्ञातार्थः शब्दः

(C) दुष्टः शब्दः (D) अनेकार्थकः शब्दः

21. 'सिद्धे शब्दार्थसम्बन्धे' इत्यस्मिन् वार्त्तिके सिद्धशब्दस्य कोऽर्थः ?

(A) दृढः

(B) स्थायी

(C) नित्यः

(D) फलदायकः

22. एध् धातोः लोट् लकारस्य प्रथमपुरुषे बहुवचने किं रूपम् अस्ति ?

(A) एधन्ताम्

(B) एधन्तु

(C) ऐधन्ताम्

(D) ऐधन्त

23. निम्नलिखितेषु कः प्रयोगः साधुः ?

(A) रामं क्रुध्यति

(B) रामाय क्रुध्यति

(C) रामेण सह क्रुध्यति

(D) रामे क्रुध्यति

24. संस्कृतवैयाकरणान्तं मते यकारः कस्मिन् वर्गे आयाति ?

(A) स्पर्श वर्गे

(B) ऊष्म वर्गे

(C) अन्तःस्थ वर्गे

(D) कस्मिन्नपि वर्गे न

25. प्रतिविषयाध्यवसाय:

(A) दृष्टम्
(B) अनुमानम्
(C) उपमानम्
(D) आप्तवचनम्

26. सांख्यानुसारं व्यक्तम् –

(A) अहेतुमत्
(B) अनाश्रितम्
(C) एकम्
(D) अनित्यम्

27. वेदान्तसारानुसारम् आकाशाद् उत्पद्यते –

(A) वायु:
(B) अग्नि:
(C) पृथिवी
(D) जलम्

28. वेदान्तसारानुसारं 'तत्त्वमसि' वाक्यं केन साधनेन अखण्डार्थ बोधकम् –

(A) प्रत्यक्षप्रमाणेन
(B) सम्बन्धत्रयेण
(C) षट्सन्निकर्षेण
(D) सम्बन्धद्वयेन

29. लौगाक्षिभास्करानुसारं धर्मजिज्ञासा कदा कार्या ?

(A) व्याकरणाध्ययनान्तरम्

(B) तपश्चर्यानन्तरम्

(C) वेदाध्ययनान्तरम्

(D) वेदान्तदर्शनाध्ययनानन्तरम्

30. अर्थसंग्रहानुसारं लिङ्गं किम् ?

(A) शब्दसामर्थ्यम्

(B) अर्थसामर्थ्यम्

(C) प्रकरणसामर्थ्यम्

(D) धर्मसामर्थ्यम्

31. कविपरम्परायां कः आदिकविः कथ्यते ?

(A) कालिदासः

(B) अश्वघोषः

(C) वाल्मीकिः

(D) वेदव्यासः

32. हनुमान् कस्य राज्ञः मंत्री आसीत् ?

(A) विभीषणस्य

(B) बालेः

(C) सुग्रीवस्य

(D) अङ्गदस्य

33. नकुलस्य मातुः नाम किम् आसीत् ?

(A) माद्री (B) कुन्ती

(C) राधिका (D) त्रिशला

34. गान्धारप्रदेशस्य का राज्ञी आसीत् ?

(A) दुर्योधनस्य माता (B) नकुलस्य माता

(C) अर्जुनस्य माता (D) अभिमन्योः माता

35. श्रीमद्भागवतपुराणे कस्य चरितम् प्राधान्येन वर्तते ?

(A) शिवस्य (B) कृष्णस्य

(C) मार्कण्डेयस्य (D) हरिश्चन्द्रस्य

36. वास्तुशास्त्रस्य विवरणं कस्मिन् पुराणे विद्यते ?

(A) विष्णुपुराणे (B) शिवपुराणे

(C) अग्निपुराणे (D) देवीभागवतपुराणे

37. कौटिल्यार्थशास्त्रानुसारेण "चतस्र एव विद्याः" इति कथनमस्ति –

(A) मानवस्य (B) कौटिल्यस्य

(C) शौनकस्य (D) नन्दस्य

38. कौटिल्यार्थशास्त्रानुसारेण कीदृशो दण्डः पूज्यः ?

(A) तीक्ष्णदण्डः (B) मृदुदण्डः

(C) यथार्हदण्डः (D) प्रायश्चित्तरूपदण्डः

39. मनुस्मृत्यनुसारेण धर्ममूलमस्ति –

(A) सत्यम् (B) अहिंसा

(C) मनुस्मृतिः (D) वेदः

40. मनुस्मृत्यनुसारेण भूतेषु के श्रेष्ठाः ?

(A) प्राणिनः (B) ब्राह्मणाः

(C) राजानः (D) विद्वांसः

41. याज्ञवल्क्यस्मृत्यनुसारेण नृपः कैः सह व्यवहारान पश्येत् ?

(A) विद्वद्भिः सह (B) विद्वद्भिर्ब्राह्मणैः सह

(C) न्यायाधीशैः सह (D) पूगैः सह

42. याज्ञवल्क्यस्मृत्यनुसारेण कीदृशाः सभासदः कार्याः ?

(A) ऋषयः
(B) रिपौ मित्रे च ये असमाः
(C) ग्रामाध्यक्षाः
(D) रिपौ मित्रे च ये समाः

43. हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकाऽपि वा। पद्ये अस्मिन् कोऽलङ्कारः ?

(A) उपमा
(B) रूपकम्
(C) अर्थान्तरन्यासः
(D) श्लेषः

44. दिलीपः कस्मिन् वंशे जातः ?

(A) मनोः
(B) रघोः
(C) भरतस्य
(D) चन्द्रस्य

45. 'सदानुकूलेषु हि कुर्वते रतिं
नृपेष्वमात्येषु च सर्वसम्पदः ।'

अत्र 'कुर्वते' इति पदस्य व्याकरणं देयम्

(A) कृ + लट् प्रथम पुरुष एकवचनम्
(B) कृ + लट् प्रथम पुरुष बहुवचनम्
(C) कृ + लिट् प्रथम पुरुष एकवचनम्
(D) कृ + लट् मध्यम पुरुष बहुवचनम्

46. 'शिशुपालवधम्' कीदृशं काव्यम् अस्ति?

(A) महाकाव्यम्
(B) खण्डकाव्यम्
(C) गीतिकाव्यम्
(D) प्रशस्तिकाव्यम्

47. 'न का निशि स्वप्नगतं ददर्श तम्'

पद्येऽस्मिन् 'तम्' इति पदं कस्यार्थे प्रयुक्तम् ?

(A) रघो:
(B) नलस्य
(C) कृष्णस्य
(D) दिलीपस्य

48. 'अर्थगौरवम्' कस्य कवे: प्रसिद्धम् अस्ति ?

(A) माघस्य
(B) भारवे:
(C) कालिदासस्य
(D) बाणस्य

49. कर्तव्यं रणशिरसि प्रियं कुरूणां

दृष्टव्यो यदि स भवेद्धनञ्जयो मे ।

इयम् उक्ति: कस्यास्ति ?

(A) दुर्योधनस्य
(B) कर्णस्य
(C) शिशुपालस्य
(D) शल्यराजस्य

50. 'अर्थो हि कन्या परकीय एव'

उक्तिरियं कस्मात् काव्याद् नाटकाद् वा उद्धृतास्ति ?

(A) मृच्छकटिकात्
(B) अभिज्ञानशाकुन्तलात्
(C) शिशुपालवधात्
(D) रघुवंशात्

51. मुद्राराक्षस नाटके चाणक्यः कस्य विनाशमिच्छति ?

(A) राक्षसस्य
(B) नन्दवंशस्य
(C) चन्द्रगुप्तस्य
(D) मलयकेतोः

52. किं शास्त्रम् पञ्चमो वेदः कथ्यते ?

(A) आयुर्वेदः
(B) धनुर्वेदः
(C) धर्मशास्त्रम्
(D) नाट्यशास्त्रम्

53. नाट्यशास्त्रस्य रचनायां ब्रह्मा कस्माद् वेदात् अभिनयं गृहीतवान् ?

(A) ऋग्वेदात्
(B) यजुर्वेदात्
(C) सामवेदात्
(D) अथर्ववेदात्

54. दशरूपकस्य मुख्यं प्रतिपाद्यं किमस्ति ?

(A) अलङ्कारा: (B) नाट्यकाव्यम्

(C) गद्यकाव्यम् (D) ध्वनि:

55. तर्कसंग्रहानुसारं शुक्तौ 'इदं रजतम्' इति ज्ञानम् –

(A) संशय: (B) यथार्थ:

(C) उपमिति: (D) अयथार्थ:

56. तर्कसंग्रहानुसारं पदार्था: –

(A) सप्त (B) षट्

(C) षोडश (D) पञ्चविंशति:

57. तर्कसंग्रहानुसारं सन्दिग्धसाध्यवान् –

(A) सपक्ष: (B) पक्ष:

(C) विपक्ष: (D) प्रतिपक्ष:

58. तर्कभाषानुसारं प्रमेयाणि –

(A) एकादश (B) द्वादश

(C) सप्त (D) चत्वारि

59. यदा चक्षुषा घटरूपं गृह्यते तदा अयं सन्निकर्षः –

(A) संयुक्तसमवायः (B) समवायः

(C) संयोगः (D) विशेषणविशेष्यभावः

60. तर्कभाषानुसारम् अन्वयव्यतिरेकिहेतुः –

(A) त्रिरूपोपन्नः (B) पञ्चरूपोपन्नः

(C) चतूरूपोपन्नः (D) षड्रूपोपन्नः

61. गोपथब्राह्मणस्य सम्बन्धोऽस्ति –

(A) सामवेदेन (B) अथर्ववेदेन

(C) यजुर्वेदेन (D) ऋग्वेदेन

62. समानाक्षराणि-इति विषय कस्मिन् ग्रन्थेऽस्ति ?

(A) दैवतकाण्डे (B) ऐतरेयब्राह्मणे

(C) ऋक्प्रातिशाख्ये (D) यजुर्वेदे

63. निरुक्तानुसारेण ऋचः सन्ति –

(A) त्रिविधः (B) चतुर्विधः

(C) द्विविधः (D) पञ्चविधः

64. वाक्यपदीयानुसारं जगतः प्रक्रिया कुतः भवति ?

(A) ईश्वरात्
(B) प्रकृतेः
(C) पुरुषात्
(D) शब्दब्रह्मणः

65. ब्रह्मणः अनुकारः कोऽस्ति ?

(A) प्रकृतिः
(B) विकृतिः
(C) जगत्
(D) वेदः

66. शब्दब्रह्मणः आसन्नं किं शास्त्रमस्ति ?

(A) व्याकरणम्
(B) धर्मशास्त्रम्
(C) ध्वनिशास्त्रम्
(D) शिक्षा

67. योगानुसारं चित्तस्य वृत्तयः कति ?

(A) चतस्रः
(B) तिस्रः
(C) षट्
(D) पञ्च

68. शंकरमतानुसारं 'ब्रह्मजिज्ञासा' इति पदस्य विग्रहोऽस्ति –

(A) ब्रह्मणो जिज्ञासा (B) ब्रह्मणि जिज्ञासा

(C) ब्रह्मणे जिज्ञासा (D) ब्रह्म जिज्ञासा

69. 'यत् सत् तत् क्षणिकम्' इति मतम् –

(A) वेदान्तिनाम् (B) मीमांसकानाम्

(C) जैनानाम् (D) बौद्धानाम्

70. संकेतितार्थः को भवति ?

(A) वाच्यार्थः (B) लक्ष्यार्थः

(C) व्यङ्ग्यार्थः (D) तात्पर्यार्थः

71. 'वक्रोक्तिजीवितम्' कस्य रचना अस्ति ?

(A) दण्डिनः (B) आनन्दवर्धनस्य

(C) विश्वनाथस्य (D) कुन्तकस्य

72. पण्डितराजजगन्नाथस्य का रचनाऽस्ति ?

(A) काव्यमीमांसा (B) साहित्यदर्पणम्

(C) रसगङ्गाधरः (D) शृङ्गारप्रकाशः

73. अशोकस्य पश्चिमोत्तरक्षेत्रीयाणां शिलालेखानां का लिपिः ?

(A) खरोष्ठी (B) गुप्तलिपिः

(C) सिन्धुलिपिः (D) अरबी

74. निम्नलिखितासु इदानीं यावत् का लिपिः न पठिता ?

(A) गुप्तलिपिः (B) खरोष्ठी लिपिः

(C) देवनागरी लिपिः (D) सिन्धुलिपिः

75. एहोल शिलालेखः कस्य राज्ञः अस्ति ?

(A) धारसेनस्य (B) यशोदेववर्मणः

(C) पुलकेशी द्वितीयस्य (D) हर्षवर्धनस्य